# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-3)(New)** | **प्रश्नपत्रम् – 3** | गुणाः –70 |
| विषयः – रामानुजवेदान्तः | **कोड –C.C.5.3.8** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –11/10/2019 | सन्दर्भग्रन्थः – वेदार्थसंग्रहः | |

**प्रथमान्वितिः (Unit 1)** — गुणाः

**प्रश्न १ कस्याऽपि एकस्य उत्तरं लिखत।** ५

१ प्रथममंगलश्लोकं प्रतिपाद्य प्रतिपाद्यार्थविषयं संक्षेपेण निरूपयत।

२ जीवभेदपरस्परभेदजीवपरमात्मस्वरूपभेदानां उपबृंह्मानुगृहीतश्रुत्यर्थतां मनसिकृत्य जीवस्वरूपं निरूपयत।

**प्रश्न २ कस्यचिदेकस्य उत्तरं लिखत।** १०

१ ब्रह्मणोक्तान्तर्यामिस्वरूपं यथाग्रन्थं विवेचयत।

२ सद्विद्या श्रुत्यां सच्छब्दवाच्यं जगदुपादाननिमित्तोभयरूपं ब्रह्मैव न सजातीयविजातीयस्वगतभेदशून्यं ब्रह्मेति वाचो युतन्या संसाधयत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ कस्याप्येकस्य प्रश्नस्य समाधानं यथाग्रन्थं विधेयम्।** ५

१ अपि च प्रत्यक्षदृष्टस्य प्रपंचस्य मिथ्यात्वं केन प्रमाणेन बाध्यते इति विशदयत।

२ वस्तुतः तु नाकाशरूपम् अपि तु सात्विकाहंकारपरिणामः इत्यस्य तात्पर्यं प्रतिपादयत।

**प्रश्न ४ कस्यचिदेकस्य सविस्तरम् उत्तरं लेख्यम्।** १०

१ सृष्टेः प्रागपि जगद्ब्रह्मणोः शरीरशरीरिभावं यथाग्रन्थं निरूपयत।

२ ब्रह्मणः सर्वशब्दवाच्यत्वे किं प्रमाणमिति विवेचयत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ एकस्य प्रश्नस्योत्तरं लिखत।** ५

१ अजामेकां लोहितशुक्लकृष्णां बह्वी प्रजां जनयन्ती सरूपाम्।
अजो ह्येको जुषमाणोऽनुशेतेते जहात्येनां भुक्तभोगामजोऽन्यः॥
इत्यस्य तात्पर्यं प्रतिपादयत।

२ व्यक्तम् विष्णुस्तथाव्यक्तं पुरुषः काल एव च।
स एव क्षोभको ब्रह्मन् क्षोभ्यस्तु परमेश्वरः॥
इत्यस्य भावार्थं सविशदमुपपादयत।

**प्रश्न ६ कस्यचिदेकस्य विस्तारेण उत्तरं लेख्यम्।** १०

१ जीवस्य ज्ञानैकाकारत्वे प्रमाणं प्रतिपादयत।

२ जगतो भगवदेकनियाम्यत्वे प्रमाणं दर्शयत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ एकस्य प्रश्नस्योत्तरं लिखत।** ५

१ एकत्वे सति नानात्वं नानात्वे सति चैकता।
अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हति॥
इत्यस्य श्लोकस्यार्थविचारं विशदीकुरुत।

२ विचित्रानन्तशक्तियुक्तं ब्रह्म इति सप्रमाणं विशदयत।

**प्रश्न ८ कस्यचिदेकस्य उत्तरं लेख्यम्।** १०

१ मोक्षोपायस्वरूपं यथाग्रन्थं विशदयत।

२ परमव्योमातीतशिवतत्त्वस्य निराकरणं यथाग्रन्थं विवेचयत।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ वेदार्थसंग्रहस्य रचयिता कः?

२ जीवस्य भेदास्सन्ति कति ? के च ते?

३ नित्यविभूतिः जडस्वरूपास्ति वाजडस्वरूपा?

४ कालो जड उताजडः?

५ भास्करमते जीवब्रह्मणोर्भेदः औपाधिकः उत स्वाभाविकः?

६ श्रीमच्छंकराचार्यमते निर्विशेषचिन्मात्रं ब्रह्म सत्यमसत्यं वा?

७ ब्रह्म कया शक्त्या विविधं त्रिलोकात्मकं जगत् पश्यति?

८ वेदार्थसंग्रहे कः सिद्धान्तः निर्णीतः?

९ चतुर्विंशतितत्त्वात्मिका का?

१० जीवः अणुः उत विभुः?

११ शेषी कः?

१२ चिदचिच्छरीरकं किम्?

१३ नामरूपविभागानर्हसूक्ष्मदशापन्नप्रकृतिपुरुषशरीरं ब्रह्म कारणमुत कार्यम्?

१४ माया गुणमयी निर्गुणमयी वास्ति?

१५ सत्यरजस्तमोगुणात् किं संजायते?